# DEPARTMENT OF SANSKRIT
# HINDU COLLEGE GUNTUR

2020-2021 student seminar

# HINDU COLLEGE, GUNTUR

## STUDENT SEMINAR

Name of the Department : Sanskrit

Student Name : K. Jashwanth Reddy

Year & Group : B.Com 1st year 2nd Sem

Paper :

Topic : Kalidasa

Date : 23-06-2022 - 2nd Sem II

Time : 10. 11:40 - 12:30

Duration : 6min


No. of students attended : 20


PRINCIPAL

HOD


Note: Attach necessary documents like

1. Topic Synopsis
2. Photographs


* संस्कृतम् * SEMINAR *



Two Famous Litterateurs



महाकवि: कालिदास:

# महाकविः कालिदासः

प्रबंधः :-

प्रस्तावना :-

"कविकुलगुरुः कालिदासो विलासः" इति सहृदयैः संस्कृत महाकविः कालिदासः सर्वेषां काव्यनिर्माणे मार्गदर्शकः उत्तमप्रतिभागुणैः कविलोके गुरुत्वम् आवहति। अस्य लोकोत्तररचनाचातुर्येन शात् सरस्वत्याः विलास एव कालिदासः इति प्रसिद्धिः समागता। तदनन्तरकालिक संस्कृतकविषु अस्य कवेः प्रभावः सुदृढो विराजते।

कालिदासस्य जीवनम् :-

अस्य जन्मस्थान जीवनरङ्गवेदिका च उज्जयिनीति चारित्रकविबुधाः अभिप्रयन्ति। मेघदूतकाव्ये निबद्धम् उज्जयिनीप्रान्तवर्णनम् अस्य जन्मस्थानप्रमाणं सुस्पष्टं एव। परन्तु कविरयं श्री·श· प्रथमशताब्दीयः इति बहवो विद्वांसः निर्धारयन्ति।

कालिदासकृतयः

## कालिदासस्य रचना :-

### महाकाव्ये :-

१. रघुवंशम् - सूर्यवंशे जातानां राज्ञां रघ्वादीनां समुदात्तचरित्राणि वर्णितानि।

२. कुमारसम्भवम् - शिवपार्वत्योः दिव्यप्रणयफलभूतस्य कुमारजननस्य वृत्तान्तः उदात्तं शृङ्गाररसेन मनोज्ञतया अभिवर्णितः।

### लघुकाव्ये -

१. ऋतुसंहारः :- वसन्तादीनाम् ऋतूनां वर्णनमत्र उपनिबद्धम्।

२. मेघदूतम् :- परिमाणेन लघ्वपि काव्यमेतत् संस्कृतसाहित्ये अलघु यशः समपादयत्। कश्चन यक्षः शापात् भुवि पतितः सन् अलकानगरे स्थितां स्वीयां प्रियां प्रति मेघद्वारा सन्देशं प्रेषयामास।

रूपकाणि –

१. मालविकाग्निमित्रम् –

मालविका कथानायिका अग्निमित्रश्च राजा नायकः। तयोः प्रणयवृत्तं नाटकेऽस्मिन् मनोज्ञतया अभिवर्णितम्।

२. विक्रमोर्वशीयम् :–

चक्रवर्तिनो विक्रमादित्यस्य उर्वशीनाम्न्याः अप्सरसः प्रेमोदन्तः अत्र उपनिबद्धः।

३. अभिज्ञानशाकुन्तलम् – शकुन्तला - दुष्यन्तयोः ~~रम्य~~ रम्यवृत्तं कालिदासेन रसाप्लावितनाटकरूपेण परिवर्तितम्। कालिदासस्य सर्वेषु ग्रन्थेषु शाकुन्तलं श्रेष्ठतमम् इति विबुधाः कीर्तयन्ति।

कालिदासस्य प्रतिभागुणा :

* कालिदास: प्रकृतिवर्णने सिद्धहस्त: । रघुवंशे यथा - आकाशे सारसपक्षिणां पंक्ति : छन्दमशहिता तोरणमालिका इव विराजते ।

* स : उपमालंकारप्रयोगे महान् निपुण : ।


यथा रघुवंशे -


" पावृषेण्यं पयोवाहं विद्युदैरावताविव
हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव "

THE END

Doree!!

# महाकविः कालिदासः




महाकवी
कालिदास
कुंदन तांबे

# महाकविः-कालिदासः

## प्रारंभः

## प्रस्तावना :-

"कविकुलगुरुः" कालिदासो विलासः" इति सहृदयैः संस्तुतः महाकविः कालिदासः सर्वेषां काव्यनिर्माणे मार्गदर्शकैः उत्तमप्रतिभागुणैः कविलोकगुरुत्वम् आवहति। अस्य लोकोत्तररचनाचातुर्यवशात् सरस्वत्याः विलासः एव कालिदासः इति प्रसिद्धिः समागता। तदनन्तरकालिकसंस्कृतकविषु अस्य कवेः प्रभावः सुदृढो विराजते।

## कालिदासस्य जीवनं :-

अस्य जन्मस्थानं जीवनरङ्गवेदिका च उज्जयिनीति चारित्रकविबुधाः अभिप्रयन्ति मेघदूतकाव्ये निबद्धम् उज्जयिनीति चारित्रकविबुधाः अभिप्रायन्ति। मेघदूतकाव्ये निबद्धम् उज्जयिनीप्रान्तवर्णनम् अस्य जन्मस्थानप्रणयं सुभृशं व्यनक्ति। कालिदासस्य कालः अद्यापि चर्चनीयांशं एव। परन्तु कविरयं क्री.शा. प्रथमशताब्दीयः इति बहवो विद्वांसः निर्धारयन्ति।




महकाव्ये



लघुकाव्ये

# HINDU COLLEGE, GUNTUR

## STUDENT SEMINAR

Name of the Department : Sanskrit

Student Name : Ch. Krishna Amarnath

Year & Group : B.Com Computer 1st year

Paper : पञ्चतन्त्रम्

Topic : Vishno Sharma (Panchantra)

Date : 14-02-2022 - Sem-I

Time : 1st Hour 10:00 - 10:50AM

Duration : 5min


No. of students attended : 30


PRINCIPAL


HOD

Note: Attach necessary documents like

1. Topic Synopsis
2. Photographs


SEMINAR


पंचतंत्र
प्राचीन कथा-साहित्य की अनुपम कृति


THE
HITOPADEŚA
OF
ŚRI NARAYANA PANDITA





# Sanskrit Manuscripts

## Panchatantra in Sanskrit: Manuscripts of stories in Sanskrit language

Home | Background | Stories | Complete Works | Sanskrit Manuscripts

- Sanskrit Manuscripts: Panchatantra in Sanskrit Language.

- Complete Works
- Sanskrit Manuscripts

... Vishnu Sharma, thanks to priceless research by scholars. ... the advancement with pictures for illustration of the moral ... the Panchatantra:

पञ्चतन्त्रम् - इत्यस्मात् पुनर्निर्दिष्टम्

लेखक - विष्णुशर्मा

कथामुखम्

ॐ नमः श्रीशारदागणपतिगुरुभ्यः । महाकविभ्यो नमः ।

ब्रह्मा रुद्रः कुमारो हरिवरुणयमा वह्निरिन्द्रः कुबेरः

चन्द्रादित्यौ सरस्वत्युदधियुगनगा वायुरुर्वीभुजङ्गाः ।

सिद्धा नद्यो श्विनौ श्रीर् दितिर् अदितिसुता मातरश् चंडिकाद्या

वेदास्तीर्थानि यक्षा गणवसुमुनयः पन्तु नित्यं ग्रहाश्च ॥

मनवे वाचस्पतये शुक्राय पराशराय ससुताय।

चाणक्याय च विदुषे नमोऽस्तु नयशास्त्रकर्तृभ्यः ॥०.१॥

सकलार्थशास्त्रसारं जगति समालोक्य विष्णुशर्मेदम्।

तन्त्रैः पञ्चभिरेतच्चकार सुमनोहरं शास्त्रम् ॥०.२॥

तद् यथानुश्रूयते। अस्ति दक्षिणात्ये जनपदे महिलारोप्यं नाम नगरम्।

तत्र सकलार्थिसार्थकल्पद्रुमः प्रवरडक्पमुकुटमणिम् अजरीचयचर्चितचरणयुगलः सकलकल्पपारंगतेऽमरशक्तिर् नाम राजा बभूव। तस्य त्रयः पुत्राः परमदुर्मेधसो वसुशक्तिरुग्रशक्तिरनेकशक्तिश्चेति नामानो बभूवुः।

अथ राजा तान् शास्त्रविमुखान् आलोक्य सचिवान् आहूय प्रोवाच ।

भोः ज्ञातम् एतद् भवद्भिर्यः ममैते त्रयोऽपि पुत्राः शास्त्रविमुखा विवेकहीनाश्च।


तदेतान् पश्यतो मे महदपि राज्यं न सौख्यम् आवहति । अथवा साध्विदम् उच्यते

अजातमृतमूर्खेभ्यो मृताजातौ सुतौ वरम्।

यतस्तौ स्वल्पदुःखाय यावज्जीवं जडो दहेत् ॥०.३॥

वरं गर्भस्रवो वरं मृतेषु नैवाभिगमनम्

वरं जातः प्रोतो वरमपि च कन्यैव जनिता।
वरं वन्ध्या भार्या वरमपि च गर्भेषु वसतिः
न चाविद्वान् रूपद्रविणगुणयुक्तोऽपि तनयः॥ ०.४॥
किं तया क्रियते धेन्वा या न सूते न दुग्धदा।
कोऽर्थः पुत्रेण जातेन यो न विद्वान्न भक्तिमान्॥ ०.५॥
तदेतेषां यथा बुद्धिप्रबोधनं भवति तथा कोऽप्युपायो नुष्ठीयताम् ।
अत्र च महतां वृत्तिं भुञ्जानानां पण्डितानां पञ्चशती तिष्ठति।
ततो यथा मम मनोरथाः सिद्धिं यान्ति तथानुष्ठीयतामिति।
तत्रैकः प्रोवाचदेव द्वादशभिर्वर्षैर्व्याकरणं श्रूयते ।
ततो धर्मशास्त्राणि आदीनि अर्थशास्त्राणि चाणक्यादीनि कामशास्त्राणि वात्स्यायनादीनि।
एवञ्च ततो दर्मार्थकामशास्त्राणि ज्ञायन्ते। ततः प्रतिबोधनं भवति।
अथ तन्मध्यतः सुमतिर्नाम सचिवः प्राह । अशाश्वतो यं जीवितव्यविषयः। प्रभूतकालज्ञेयानि शब्दशास्त्राणि।
तत् सङ्क्षेपमात्रं शास्त्रं किञ्चित्तेतेषां प्रबोधनार्थं चिन्त्यतामिति। उक्तं च यतः
अनन्तपारं किल शब्दशास्त्रम्
स्वल्पं तथायुर्बहवश्च विघ्नाः।
सारं ततो ग्राह्यमपास्य फल्गु
हंसैर्यथा क्षीरमिवाम्बुमध्यात् ॥ ०.६॥
तदत्रास्ति विष्णुशर्मा नाम ब्राह्मणः सकलशास्त्रपारङ्गमः छात्रसंसदि लब्धकीर्तिः। तस्मै समर्पयतु एतान्।
स नूनं द्राक् प्रबुद्धान् करिष्यति इति।
स राजा तदाकर्ण्य विष्णुशर्माणमाहूय प्रोवाच ।
भोः भगवन् मदनुग्रहार्थमेतान् अर्थशास्त्रं प्रति द्राग् यथानन्यसदृशान् विदधासि तथा कुरु।
तदाहं त्वां शासनशतेन योजयिष्यामि।
अथ विष्णुशर्मा तं राजानमाहदेव श्रूयतां मे तथ्यवचनम्। नाहं विद्याविक्रयं शासनशतेनापि करोमि।
पुनरेतान् तव पुत्रान् मासषट्केन यदि नीतिशास्त्रज्ञान् न करोमि ततः स्वनामत्यागं करोमि।
अथासौ राजा तां ब्राह्मणस्यासम्भाव्यां प्रतिज्ञां श्रुत्वा ससचिवः प्रहृष्टो विस्मयान्वितस्तस्मै सादरं तान् कुमारान्
समर्प्य परां निर्वृतिम् आजगाम।
विष्णुशर्मणापि तान् आदाय तदर्थं मित्रभेदमित्रप्राप्तिकाकोलूकीयलब्धप्रणाशापरीक्षितकारकाणि चेति पञ्चतन्त्रा
णि रचयित्वा पाठिताः ते राजपुत्राः। तेपि तानधीत्य मासषट्केन यथोक्ताः संवृत्ताः।
ततः प्रभृत्येतत् पञ्चतन्त्रं नाम नीतिशास्त्रं बालबोधनार्थं भूतले प्रवृत्तम्। किं बहुना
अधीते य इदं नित्यं नीतिशास्त्रं शृणोति च।
न पराभवमवाप्नोति शक्रादपि कदाचन ॥०.७॥
इति कथामुखम्।



प्रवर्तन्ते क्रियाः सर्वाः पर्वतेभ्य इवापगाः ॥१.६॥
पूज्यते यदपूज्योऽपि यदगम्योऽपि गम्यते ।
वन्द्यते यदवन्द्योऽपि स प्रभावो धनस्य च॥ १.७॥
अशनादिन्द्रियाणीव स्युः कार्याण्यखिलान्यपि ।
एतस्मात्कारणाद्वित्तं सर्वसाधनमुच्यते ॥१.८॥
अर्थार्थी जीवलोकोऽयं श्मशानमपि सेवते।
त्यक्त्वा जनयितारं स्वं निःस्वं गच्छति दूरतः॥१.९॥
गतवयसामपि पुंसाम्येषामर्था भवन्ति ते तरुणाः।
अर्थो तु ये हीना वृद्धास्ते यौवनेपि स्युः ॥१.१०॥
स चार्थः पुरुषाणां षड्भिरुपायैर्भवति भिक्षया अड्पसेवया कड्षिकर्मणाविद्योपार्जनेन व्यवहारेण वणिक्कर्मणा वा।
सर्वेषाम् अपि तेषाम् वाणिज्येनातिरस्कड्तो र्थलाभःस्यात्। उक्तम् च यतः
कड्ता भिक्षानेकैर् वितरति अड्पो नोचितम् अहो
कड्षि क्लिष्टा विद्या गुरुविनयव्ड्त्त्यातिविषमा।
कुसीदाद् दारिद्यम्परकरगतग्रंथिशमनान्
न मये वाणिज्यात् किम् अपि परमम्वर्तनम् इह॥पञ्च_१.११॥

Tales of panchatantra

Home | Background | Stories | Complete Works | Sanskrit Manuscripts

Sanskrit Manuscripts: Panchatantra in Sanskrit Language.

Complete Works
न किम् अथ काञ्चनादाना।
...तेन प्रदीयते॥पञ्च_१.१३॥
Sanskrit Manuscripts
...स्वदेवताम्।
निक्षेपा ग्रयत तुभ्यम्प्रदास्याम्य् उपयाचितम्॥पञ्च_१.१४॥
गौष्ठिककर्मनियुक्तः श्रेष्ठी चिंतयति चेतसा हड्ष्टः।
वसुधा वसुसंपूर्णा मयाद्य लब्धा किम् अयेन॥पञ्च_१.१५॥
परिचितम् आगच्छंतम्ग्राहकम् उत्कंठ्या विलोकयासौ।
हड्ष्यति तद्धनलब्धो यद्वत् पुत्रेण जातेन॥पञ्च_१.१६॥
अंयच् च
पूर्णापूर्णे माने परिचितजनवञ्चनम्तथा नित्यम्।
मिथ्याक्रयस्य कथनम्प्रकड्तिर् इयम् स्यात्किरातानाम्॥पञ्च_१.१७॥
द्विगुणम् त्रिगुणम् वित्तम् भांडक्रयविचक्षणाः।
प्राप्नुवंत्य् उद्यमात् लोका दूरदेशांतरम् गताः॥पञ्च_१.१८॥
इत्य् ऐवम् संप्रधार्य मथुरागामीनि भांडाय् आदाय शुभायाम्तिथौ गुरुजनानुज्ञातः सुरथाधिरूढः प्रस्थितः।
तस्य च मंगलव्ड्षभ सम्जीवकनंदकनामानौ ग्ढोत्पन्नौ धूर्वोढारौस्थितौ। तयोर् ऐकः सम्जीवकाभिधानोयमुनाकच्छम्
अवतीर्णः संपकपूरम् आसाद्य कलितचरणो युगभंगम् विधाय विषसाद।
अथ तम् तदवस्थमआलोक्य वर्धमानः परम् विषादमआगमत्।
तद् अर्थम् च स्नेहार्द्रहड्दयस्त्रिरात्रम् प्रयाणभंगमअकरोत्।
अथ तम् विषण्णमआलोक्य साड्थिकैर् अभिहितम् भोः श्रेष्ठिन्! किम् ऐवम् व्ड्षभस्य कड्ते सिम्हव्याघ्रसमाकुले बहव्

पायेस्मिन् वने समस्तसार्थस्त्वया संदेहे नियोजितः। उक्तम्च

स्वल्पस्य कृते भूरि नाशयेन् मतिमान् नरः।

तद् ऐवात्र पाडित्यम्यत् स्वल्पाद् भूरिरक्षणम्॥पञ्च_१.१९॥

थासौ तद् अवधार्य सञ्जीवकस्य रक्षापुरुषान् निरूप्याशेषसार्थम्नीत्वा प्रस्थितः।

अथ रक्षापुरुषा अपि बहुअपायम्तद्वनम् विदित्वा सञ्जीवकम् परित्यज्य पृष्ठतो गत्वान्येद्युस्तम् सार्थवाहम् मिथ्

ाहुः स्वामिन्, मृतोसौ सञ्जीवकः। अस्माभिस्तु सार्थवाहस्याभीष्ट इति मत्वा वह्निना सम्स्कृतःइति।

त् श्रुत्वा सार्थवाहः कृतज्ञतया स्नेहार्द्रहृदयस् तस्यौर्ध्वदेहिकक्रियावृषोत्सर्गादिकाः सर्वाश् चकार।

सञ्जीवकोप्य् आयुःशेषतया यमुनासलिलमिश्रैः शिशिरतरवातैर् आप्यायितशरीरः कथम्चिद् अप्य् उत्थाय यमुनातटम्

ापेदे।

त्र मरकतसदृशानि बालतृणाग्राणि भक्षयन् कतिपयैर् अहोभिर् हरवृषभ इव पीनःककुद्मान् बलवान्श् च सम्वृत्तः।

प्रत्यहम् वल्मीकशिखराग्राणि शृंगाभ्याम् विदारयन् गर्जमान आस्ते। साधुचेदम् उच्यते

अरक्षितम् तिष्ठतिदैवरक्षितम्

सुरक्षितम् दैवहतम् विनश्यति।

ीवत्य् अनाथो पि वने विसर्जितः

ृतप्रयत्नो पि गृहे विनश्यति॥पञ्च_१.२०॥

अथ कदाचित् पिंगलको नाम सिम्हःसर्वम्र्गपरिवृतः पिपासाकुल उदकपानार्थम्यमुनातटम् अवतीर्णः सञ्जीवकस्य

गभीरतररावम् दूराद् ऐवाशृणोत्।

त् श्रुत्वातीव व्याकुलहृदयः ससाध्वसम् आकारम्प्रच्छाद्य वटतले चतुर्मंडलावस्थानेनावस्थितः।

चतुर्मंडलावस्थानम् त्व् इदम् सिम्हः सिम्हानुयायिनःकाकरवाः किंवृत्ता इति।

अथ तस्य करटकदमनकनामानौ द्वौ शृगालौ मंत्रिपुत्रौ भ्रष्टाधिकारौ सदानुयायिनावआस्ताम्।

तौ च परस्परम्मंत्रयतः।

तत्र दमनको ब्रवीत् भद्र करटक, अयम्तावद् अस्मत्स्वामी पिंगलक उदकग्रहणार्थम्यमुनाकच्छम् अवतीर्य स्थितः।

स किम्निमित्तम् पिपासाकुलो पिनिवृत्त्य व्यूहरचनाम्विधाय दौर्मनस्येनाभिभूतो त्र वटतले स्थितः।

करटक आह भद्र किम् आवयोर् अनेन व्यापारेण उक्तम् च यतः

अव्यापरेषु व्यापारम्यो नरः कर्तुम् इच्छति।

स ऐव निधनम्याति कीलोत्पाटीव वानरः॥ १.२१॥

**कथा १ कीलोत्पाटिवानरकथा**

कस्मिम्श्चिन्नगराभ्यासे केनापि वणिक्पुत्रेण तरुखंडमध्ये देवतायतनम् कर्तुम् आरब्धम्।

तत्र च ये कर्मकराः स्थापनादयः।ते मध्याह्नबेलायाम् आहारार्थम्नगरमध्ये गच्छंति।

अथ कदाचित् तत्रानुषंगिकम्वानरयूथम् इतश् चेतश् च परिभ्रमद् आगतम्।

तत्रैकस्य कस्यचिच् छिल्पिनो र्धस्फाटितोञ्जनवृक्षदारुमयः स्तंभः खदिरकीलकेन मध्यनिहितेन तिष्ठति।

ऐतस्मिन् अंतरे ते वानरास्तरुशिखरप्रसादशृंगदारुपर्यंतेषु यथेच्छया क्रीडितुम् आरब्धाः।

ऐकश् च तेषाम् प्रत्यासन्नम्र्त्युश् चापल्यात्तस्मिन् अर्धस्फोटितस्तंभे उपविश्य पाणिभ्याम्कीलकम् सम्गृह्य यावद्


त्पादयितुम् आरेभेतावत् तस्य स्तंभमध्यगतवृषणस्य स्वस्थानाच् चलितकीलकेन यद् वृत्तम् तत् प्राग् ऐव निवेदि

म्। अतोहम् ब्रवीमि अव्यापारेषुइति। आवयोर् भक्षितशेष आहारो स्त्य् ऐव। तत् किम् अनेन व्यापारेण।

दमनक आह तत् किम् भवान् आहारार्थी केवलम् ऐव। तन्न युक्तम्। उक्तम् च

सुहृदाम् उपकारणाद् द्विषताम् अप्य् अपकारणात्।

ृपसम्श्रय इष्यते बुधैर् जठरम् कौन बिभर्ति केवलम्॥पञ्च_१.२२॥





किम् च
यस्मिन् जीवति जीवति बहवः सो ऽत्र जीवतु।
वयांसि किम् न कुर्वंति चञ्च्वा स्वोदरपूरणम्॥पञ्च_१.२३॥
तथा च
यज् जीव्यते क्षणम् अपि प्रथितम्मनुष्यैर्
विज्ञानशौर्यविभवार्यगुणैः समेतम्।
तन् नाम जीवितम् इह प्रवदंति तज्ज्ञाः
काको ऽपि जीवति चिराय बलिम्च भुंक्ते॥पञ्च_१.२४॥
यो नात्मना न च परेण च बंधुवर्गे
दीने दयाम् न कुरुते न च मर्त्यवर्गे।
किम् तस्य जीवितफलम् हि मनुष्यलोके
काको ऽपि जीवति चिराय बलिम्च भुंक्ते॥पञ्च_१.२५॥
सुपूरा स्यात् कुनदिका सुपूरो मूषिकाञ्जलिः।
सुसन्तुष्टःकापुरुषः स्वल्पकेनापि तुष्यति॥पञ्च_१.२६॥
किम् च
किम् तेन जातुजातेन मातुर् यौवनहारिणा।
आरोहति न यः स्वस्य वम्शस्याग्रेध्वजो यथा॥पञ्च_१.२७॥
परिवर्तिनि सम्सारेम्ऽमृतः को वा न जायते।
जातस् तु गण्यते सो ऽत्र यः स्फुरेच् च श्रियाधिकः॥पञ्च_१.२८॥
किम् च
जातस्य नदीतीरे तस्यापि तृणस्य जन्मसाफल्यम्।
यत् सलिलमज्जनाकुलजनहस्तालंबनम्भवति॥पञ्च_१.२९॥
तथा च
स्तिमितोन्नतसञ्चारा जनसंतापहारिणः।
जायंते विरला लोके जलदा इव सज्जनाः॥पञ्च_१.३०॥
निरतिशयम् गरिमाणम् तेन
जनयाः स्मरंति विद्वाम्सः।
यत् कम् अपि वहति गर्भम्
महताम् अपि यो गुरुर् भवति॥पञ्च_१.३१॥
अप्रकटीकृतशक्तिः शक्तो ऽपि जनस् तिरस्क्रियाम् लभते।
निवसंन् अंतर्दारुणि लंघ्यो वह्निर् न तु ज्वलितः॥पञ्च_१.३२॥
करटक आह आवाम्तावद् अप्रधानौ तत् किम् आवयोर् अनेन व्यापरेण।
उक्तम् च
अपृष्टो ऽत्राप्रधानो यो ब्रूते राज्ञः पुरः कुधीः।
न केवलम् असम्मानम् लभते च विडम्बनम्॥पञ्च_१.३३॥
तथा च
वचस् तत्र प्रयोक्तव्यम्यत्रोक्तम् लभते फलम्।
स्थायी भवति चात्यंतमारागः शुक्लपटे यथा॥पञ्च_१.३४॥

# VISHNU SHARMA (180 BCE)



- Composed Panchtantra – the oldest collection of fables.
- Also credited with creation of Hitopadesha
- Both these books are used to teach wisdom to even the greatest fools
- Aesop's fables and Alif Laila (Arabic Nights) were influenced by Panchtantra



# पञ्चतन्त्रम्

पञ्चतन्त्रं (Panchatantra) कश्चन कथाग्रन्थः विद्यते । अस्य ग्रन्थस्य कर्ता अस्ति विष्णुशर्मा । महिलारोप्यस्य राज्ञः अमरशक्तेः बहुशक्तिः रुद्रशक्तिः अनन्तशक्तिः इत्येतान् त्रीन् पुत्रान् षड्भिः मासैः राजनीतिनिपुणान् कर्तुं विष्णुशर्मा पञ्चतन्त्रग्रन्थं रचितवान् इति श्रूयते । पञ्चतन्त्रे गद्यं पद्यं चापि अस्ति । प्रायः कथाभागं निरूपयति गद्यम् । पद्यं च नीतिं निरूपयति ।

पञ्चतन्त्रस्य शाखाभेदः

दक्षिणापथप्रथिते नेपालदेशीये च पञ्चतन्त्रे पञ्चतन्त्रमिति नाम समानम् । अतो मूलभूतं पुस्तकं पञ्चतन्त्रनामकमासीदिति वक्तुं सुशकम् । तन्त्रपदेन अध्याया उच्यन्ते, 'तन्त्रैः पञ्चभिरेतच्चकार सुमनोहरं शास्त्रम्' इति स्मरणात् ।

पञ्चतन्त्रं नाम नैकं पुस्तकमपि तु शास्त्रमिदम् । अत्र शास्त्रे समानाभिधेयाः समानोद्देश्याः समान बहुलांशाश्च बहवो ग्रन्थाः सन्ति । पञ्चतन्त्रस्य शाखा बहुविस्ताराः । तत्र अर्धाधिको भागो विदेशेषु प्रसिध्दः । ११०० तमे खीष्टाब्दे हिब्रू – भाषायामस्यानुवादो जातोऽनन्तरमन्यान्यासु वैदेशिकभाषासु जातैरनुवादैरयं ग्रन्थः पाश्चात्त्यखण्डान् व्याप्य तिष्ठति । सम्प्रति यावा द्वीपादारभ्य 'आइसलैण्ड' पर्यन्तमस्य प्रचारो दृश्यते

मूलपञ्चतन्त्रप्रणेता[सम्पाद्यताम्]

विष्णुशर्मा अमरशक्तिनामकस्य नृपस्य त्रीन् पुत्रान् षड्भिर्मासैः राजनीतिं शिक्षयितुं ग्रन्थमिमं प्रणीतवानिति पञ्चतन्त्रस्य भूमिकातः प्रतीयते । हस्त्यश्वादियानसाधनं विहायात्रोष्ट्राऽसकृद्वर्णित इति काश्मीरदेश्योऽयं विष्णुशर्मा सम्भाव्यते ।

रचनाकालः[सम्पाद्यताम्]

अद्य पञ्चतन्त्रान्तर्गतत्वेन सम्भाविते एकत्र पद्ये दीनार-शब्दो विद्यते । दीनारो नाम मुद्राविशेषः स हि रोमनमुद्राविशेषः ग्रीसदेश-मार्गेण प्राच्यभारतादिदेशेषु प्रचारमासादितवान् । ५५० तमे क्रिस्तशताब्दे बरजोईमहाशयेनास्य पञ्चतन्त्रग्रन्थस्य पहलवी भाषायामनुवादः कृतः । एतेन सर्वेण विचार्यमाणेन तृतीये द्वितीये वा खीष्टशतके पञ्चतन्त्रस्य रचना जातेति वादं प्रत्येतुं शक्यते

विवरणम्[सम्पाद्यताम्]

एतस्मिन् ग्रन्थे पञ्च तन्त्राणि सन्ति ।

1. मित्रभेदः
2. मित्रप्राप्तिः
3. काकोलूकीयः
4. लब्धप्रणाशः

5. अपरीक्षकारिका

...तिलन्त्रम् एका प्रधानकथा भवति । नीतिबोधनार्थं पुनः तत्र बह्व्यः उपकथाः भवन्ति । पञ्चतन्त्रस्य शैली अतीव ...ला । कासुचित् कथासु लघुहास्यम् अपि दृश्यते । भारतीयसंस्कृतिः सर्वासु कथासु स्फुटतया दृश्यते । इयं ग्रन्थः ...शारदीरलिप्या लिखितः अस्ति । अस्य प्राचीनप्रतिकृतिषु 'तन्त्राख्यायिका' इति नाम दृश्यते । इदं गुप्तशासनकाले ...लिखितमिति श्रूयते । अयं ग्रन्थः नवरसैः युक्तः चमत्कारगर्भितः लोकानुभवपूर्णश्च अस्ति ।

# पञ्चतन्त्रम्

## अनुक्रमणिका


1. कथामुखम् १-७
   1. मूर्ख पुत्रस्य निन्दा, विष्णुशर्मा ब्राह्मणेन राजपुत्राणां शिक्षणम् १_७
2. प्रथमतन्त्रम् - मित्रभेदः १-५०
   1. वर्धमान वणिक्पुत्र_संजीवक वृषभ_पिङ्गलक सिंह कथा १_२१
   2. पिङ्गलक सिंह_दमनक शृगाल वार्तालापे कीलोत्पाटित वानर कथा २२_
   3. करटक_दमनक शृगालानां संवादः ३३_
3. प्रथमतन्त्रम् - मित्रभेदः ५१-१००
   1. करटक_दमनक संवादः ५१_७६
   2. पिङ्गलक सिंह_दमनक शृगाल संवादः ७७_१००
4. प्रथमतन्त्रम् - मित्रभेदः १०१-१५०
   1. पिंगलक_दमनक वार्तालापः १०१_११७
   2. गोमायु शृगाल - दुन्दुभि कथा ११८_११९
   3. दन्तिल भाण्डपति - गोरम्भ सम्मार्जक कथा १४२_
5. प्रथमतन्त्रम् - मित्रभेदः १५१-२००
   1. दन्तिल भाण्डपति_गोरम्भ सम्मार्जक कथा(सतत्) -१६२
   2. दमनक_करटक शृगालानां वार्तालापः १६२_१७३
   3. देवशर्मा परिव्राजक - आषाढभूति - कौलिक - नापित कथा १७४_
6. प्रथमतन्त्रम् - मित्रभेदः २०१-२५०
   1. देवशर्मा परिव्राजक - आषाढभूति - कौलिक - नापित कथा(सतत्) - २१४
   2. करटक_दमनक वार्तालापः २१५_२१८
   3. कौलिक - रथकार मित्राणां कथा२१८_२२७
   4. करटक_दमनक संवादः २२८
   5. वायस_कृष्णसर्प कथा २२९_२३२

6. ब्रवापत्यानि - कृष्णसर्प - नकुल कथा ४३९_४४०

7. दमनकस्य उद्गारा: ४४१_४४२

8. जीर्णधनस्य वणिक्पुत्रस्य लौहतुलाया: मूषकेण भक्षणस्य कथा ४४२_४४७

9. करटक_दमनक छद्मोपदेशा: ४४७_४५०

11. प्रथमतन्त्रम् - मित्रभेद: ४५१-४६१

1. मक्षिका व्याजेन वानरेण राजोपरि खड्गप्रहारस्य कथा ४५१_४५१

2. धूर्त विप्रेण चतुर्णां विप्राणां प्राणस्य रक्षण कथा ४५१_४५३

3. सञ्जीवक वृषभस्य सिंहेन सह युद्धे मरण, पिंगलकस्य दमनकादि सचिवै: सह राज्यकरणम् ४५३_४६१

12. द्वितीयतन्त्रम् - मित्रसम्प्राप्ति: १-५०

1. लघुपतनक वायस_चित्रग्रीव कपोत, हिरण्यक मूषक कथा १_

2. पाणिनि_जैमिनि_पिङ्गल विषयक श्लोक: ३५

13. द्वितीयतन्त्रम् - मित्रसम्प्राप्ति: ५१-१००

1. लघुपतनक वायस - हिरण्यक मूषक वार्तालाप: - ५९

2. लघुपतनक वायस - मन्थरक कूर्म - हिरण्यक मूषक वार्तालाप: ६०_६५

3. ताम्रचूड मठाधिपस्य भिक्षाप्राप्त अन्नस्य मूषकात् रक्षणस्य चिन्ता ६५ - ६९

4. ब्राह्मणेन स्वपत्न्यै भोजनदानस्य निर्देशम्, दानस्य प्रशंसा ७०_

5. धनुष्कोटिगतस्य स्नायुपाशस्य भक्षणेन शृगालस्य मृत्यु: ८१_८३

6. लुञ्चित_अलुञ्चित तिलानां क्रय_विक्रयम् ८४

7. हिरण्यक मूषकस्य वैराग्यस्य कारण, अर्थहीनस्य निन्दनम् ८६.

14. द्वितीयतन्त्रम् - मित्रसम्प्राप्ति: १०१_१५०

1. अर्थहीनस्य निन्दनम् (सतत) १०१_१११

2. प्राप्तव्यमर्थ वणिक्पुत्रस्य कथा, वणिक्पुत्रस्य राज्ञ: कन्या सह विवाह: १११ - ११४

3. मन्थरक कूर्मेण धनस्य नि:सारता कथनम् ११४_१२७

4. सोमिलक कौलिकस्य धनप्राप्ति कथा १२७_१४०

5. प्रलोभक शृगाल दम्पती द्वारा वृषभस्य वृषणानां प्राप्तिकामना कथा १४१_१४९

6. अग्निहोत्र फला इति श्लोक: १५०

15. द्वितीयतन्त्रम् - मित्रसम्प्राप्ति: १५१-१९८

1. धनस्य सम्यक दान एवं भोगस्य आवश्यकता, हिरण्यक मूषक - कूर्म संवाद: १५१_१६६

2. मूषक_कूर्म_वायस मित्रैभि: चित्रांग हरिणस्य लुब्धकात् रक्षणम् १६७_१९८

16. तृतीयतन्त्रम् - काकोलूकीयम् १-५०

1. काकराज मेघवर्णस्य उलूकानां नाशाय स्वसचिवैभिः सह मन्त्रणम् १-

17. तृतीयम् तन्त्रम् - काकोलूकीयम् ५१-१००

1. काकराज मेघवर्णस्य उलूकाना नाशाय स्वसचिवैभिः सह मन्त्रणम्(सतत) -८१
2. शशकैभिः गजानां नियन्त्रणस्य कथा ८१-९१
3. कपिञ्जल चटक - शीघ्रग शशक विवाद कथा ९१-

18. तृतीयम् तन्त्रम् - काकोलूकीयम् १०१-१५०

1. कपिञ्जल चटक - शीघ्रग शशक विवाद- तीक्ष्णदंष्ट्र मार्जार कथा (सतत) - ११०
2. सचिव - मेघवर्ण काकराजस्य मन्त्रणम् ११०-११६
3. मित्रशर्मा ब्राह्मण - धूर्त कथा ११६-१२०
4. कृष्णसर्प - पिपीलिका लघु कथा १२१-१२२
5. स्थिरजीवी सचिव - मेघवर्ण काकराज वार्तालापः १२१-१२७
6. स्थिरजीवी काक - अरिमर्दन उलूकराज वार्तालापः १२७-१२८
7. अरिमर्दन उलूकराजस्य स्वसचिवैः सह आमन्त्रणम् १२८-१३२
8. हरिदत्त ब्राह्मण - सर्प कथा १३२-१३३
9. स्वर्णिम् पिच्छ हंस - राजा कथा १३३-१३३
10. हरिदत्त ब्राह्मण - सर्प कथा (सतत) १३३
11. अरिमर्दन उलूकराजस्य स्वसचिवैः सह आमन्त्रणम् १३४
12. कपोत दम्पती द्वारा लुब्धकस्य प्राणानां रक्षण कथा १३५-

19. तृतीयम् तन्त्रम् - काकोलूकीयम् १५१-२००

1. कपोत-कपोती द्वारा शीतग्रस्त लुब्धकस्य आतिथ्यम् १५१-१८५
2. अरिमर्दन-दीप्ताक्ष वार्तालापः
3. वृद्धवणिक-भार्या-चोर कथा १८८-१८९
4. अरिमर्दन-वक्रनास सचिव वार्तालापः १९०-
5. द्रोण ब्राह्मण - गोयुग - ब्रह्मराक्षस - चोर कथा १९१-
6. राजपुत्रस्य जठरस्थसर्पवल्मीकरागस्य उपचार कथा १९१
7. रथकारस्य पत्न्याः पातिव्रत्य परीक्षण कथा १९४-१९६
8. रक्ताक्ष उलूकस्य मतम् १९८
9. शालङ्कायन तपोधन द्वारा मूषिकयाः रक्षण कथा १९९-

20. तृतीयम् तन्त्रम् - काकोलूकीयम् २०१-२५०

1. शालङ्कायन तपोधन-मूषिका कथा २०१-
2. एकत-द्वित-त्रित कथा २०६

3. शालङ्कायन-मूषिका कथा(सतत) २०६-२०४
4. रक्ताक्ष-अरिमर्दन उलूक वार्तालापः २१५
5. स्वर्णष्ठीवी सिन्धुक पक्षी कथा २१६
6. खरनखर सिंह-दधिपुच्छ शृगाल कथा २१७-२१८
7. रक्ताक्ष उलूकस्य निष्क्रमणम्, स्थिरजीवी काकस्य हर्षोद्गारः २१९-२३८
8. मन्दविष सर्प-जलपाद दर्दुर कथा २३९-२४१
9. यज्ञदत्त ब्राह्मण द्वारा पुंश्चल्यां भार्या दण्डदानस्य कथा २४१-
10. स्थिरजीवी-मेघवर्ण काकानां वार्तालापः २४२-

21. तृतीयम् तन्त्रम् - काकोलूकीयम् २५१-२६०

22. चतुर्थम् तन्त्रम् - लब्धप्रणाशम् १-५०

1. वानर - मित्रघाती मकर कथा १-१५
2. गङ्गदत्त मण्डूकराज - प्रियदर्शन सर्प कथा १६-३२
3. करालकेसर सिंह-धूसरक शृगाल-लम्बकर्ण गर्दभ कथा ३३-३७
4. खर्पर-पाटित ललाटी कुम्भकार - नृप कथा ३८
5. सिंह शावक-शृगालशिशु कथा ३९-४३
6. ब्राह्मण - कलहप्रिया भार्या - पङ्गु कथा ४४
7. भार्या वशीभूत नन्द राजा एवं वररुचि सचिवस्य कथा ४५
8. शुद्धपटक रजक-व्याघ्रचर्माच्छादित रासभ कथा४७
9. महाधन ईश्वर भाण्डपति - गर्ग, सोम, दत्त, श्यामलक जामातृणां कथा ४७
10. रथकार - पुंश्चली भार्या कथा ४८-

23. चतुर्थम् तन्त्रम् - लब्धप्रणाशम् ५१-८४


1. रथकार - पुंश्चली भार्या कथा(सतत) - ५३
2. कामातुर वृद्धवणिक - युवा भार्या - चोर कथा ५५-५७
3. भार्या मरणोपरि मकर - वानर संवादः ५८-६९
4. हालिक दम्पती-वित्तापहारक धूर्त-शृगाली कथा ६९-७०
5. मकर-वानर संवादः ७१-७३
6. उज्ज्वलक रथकार- उष्ट्री - दासरेक - सिंह कथा ७४
7. मकर-वानर संवादः ७५ - ७८
8. महाचतुरक शृगाल-सिंह-व्याघ्र-द्वीपी-शृगाल कथा ७८-८२
9. चित्राङ्ग सारमेय द्वारा देशान्तर दर्शन कथा ८३

24. पञ्चमम् तन्त्रम् - अपरीक्षितकारकम् १-५०

1. मणिभद्र श्रेष्ठी_नापित_क्षपणक कथा१_१७
2. ब्राह्मणी_शिशु_नकुल कथा १७_२१
3. लोभाविष्ट चक्रधर कथा २१_३५, ४१_४३
4. सिंहकारक मूर्ख ब्राह्मण कथा ३५_३८
5. चत्वारः मूर्ख पण्डितानां कथा ३८_४१
6. शतबुद्धि_सहस्रबुद्धि मत्स्य_एकबुद्धि मण्डूक_ धीवर कथा ४३_४८
7. रासभ_शृगाल_चिर्भटी कथा ४८_

25. पञ्चमम तन्त्रम - अपरीक्षितकारकम् ५१_९८

1. रासभ - शृगाल_चिर्भटी कथा _५६
2. चक्रधर वार्तालापः ५७
3. मन्थरकौलिक_व्यन्तर_स्त्री कथा ५७_६६
4. चक्रधर वार्तालापः ६७
5. सोमशर्मपितृ_सक्तुघट कथा ६७_६८
6. चक्रधर_सुवर्णसिद्धि वार्तालापः ६८
7. चन्द्रभूपति_ वानरयूथ_मेष कथा ६८_८०
8. चक्रधर - सुवर्णसिद्धि वार्तालापः ८१_८२
9. विकाल_वानर कथा ८२
10. चक्रधर_सुवर्णसिद्धि वार्तालापः ८३_८४
11. अन्धक_कुब्जक_त्रिस्तनी कथा ८४_९१
12. चक्रधर_सुवर्णसिद्धि वार्तालापः ९२
13. भारुण्डपक्षि कथा ९२
14. चक्रधर_सुवर्णसिद्धि वार्तालापः ९३_९४
15. ब्रह्मदत्त ब्राह्मण_ कर्कटक कथा ९४_९५
16. चक्रधर_सुवर्णसिद्धि वार्तालापः ९६





# HINDU COLLEGE, GUNTUR

## STUDENT SEMINAR

Name of the Department : SANSKRIT

Student Name : THULLURU BALA VENKATA SAI SANTOSH KUMAR

Year & Group : I[st] year (B. Com General)

Paper :

Topic : Vivekananda Swamy

Date : 24-01-2022 (Sem-III)

Time : 1[st] hour 10:00 am - 10:50 am

Duration : 5 min


No. of students attended : 25

HOD

PRINCIPAL

Note: Attach necessary documents like

1. Topic Synopsis
2. Photographs


SEMINAR

## स्वामी विवेकानंद का निबंध संस्कृत में

1.सन्ति बहवो भारतस्य वरपुत्राः येषु अविस्मरणीयः स्वामी विवेकानन्दः।
2.सः विश्वधर्मसम्मेलने भारतीय-संस्कृतेः उपादेयतां श्रेष्ठतां च प्रादर्शयत्।
3.बङ्गप्रान्तस्य कोलकातानगरे त्रिषष्ट्यधिकशततमे(१८६३) वर्षे जनवरी मासस्य द्वादशे दिने एतस्य जन्म अभवत्।
4.तस्य पिता श्री विश्वनाथदत्तमहोदयः।
5.पूर्वं तस्य नाम नरेन्द्रनाथदत्तः इति आसीत्।
6.एषः उत्साही, हास्यप्रियः, करुणापरः च आसीत्।
7.नरेन्द्रः बाल्ये कपीन्, मयूरान्, कपोतान् च पालयति स्म।
8.अध्ययनपटुरयं नरेन्द्रः शास्त्रीयसङ्गीतस्य अभ्यासं करोति स्म।
9.ध्यानसिद्धः अयं भ्रूमध्ये ज्योतिरेकं पश्यति स्म।
10.ईश्वर-जिज्ञासुः अयं सर्वान् पृच्छति स्म यत् किं भवान् ईश्वरं दृष्टवान्? इति।
11.अस्मिन्नेव समये दैवयोगात् दक्षिणेश्वरस्थे कालीमन्दिरे परमहंसस्य रामकृष्णदेवस्य दर्शनं तेन प्राप्तम्।
12.रामकृष्णमुद्दिश्य नरेन्द्रः पृष्टवान् 'किं भवान् ईश्वरं दृष्टवान् ?'इति। 'आम्।
13. त्रिनवत्यधिकाष्टादशत(१८९३)तमे वर्षे अमेरिकादेशस्य शिकागोनगरे विश्वधर्मसभायां भारतस्य गौरवं प्रतिष्ठापितवान्

सन्ति बहवो भारतस्य वरपुत्राः येषु अविस्मरणीयः स्वामी विवेकानन्दः। सः विश्वधर्मसम्मेलने भारतीय-संस्कृतेः उपादेयतां श्रेष्ठतां च प्रादर्शयत्। बङ्गप्रान्तस्य कोलकातानगरे त्रिषष्ट्यधिकशततमे(१८६३) वर्षे जनवरी मासस्य द्वादशे दिने एतस्य जन्म अभवत्। तस्य पिता श्री विश्वनाथदत्तमहोदयः। पूर्वं तस्य नाम नरेन्द्रनाथदत्तः इति आसीत्। एषः उत्साही, हास्यप्रियः, करुणापरः च आसीत्। नरेन्द्रः बाल्ये कपीन्, मयूरान्, कपोतान् च पालयति स्म।

एषः पितुः हयान् अपि रक्षति स्म। अध्ययनपटुरयं नरेन्द्रः शास्त्रीयसङ्गीतस्य अभ्यासं करोति स्म। प्रतिदिनं व्यायामं करोति स्म। ध्यानसिद्धः अयं भ्रूमध्ये ज्योतिरेकं पश्यति स्म।
ईश्वर-जिज्ञासुः अयं सर्वान् पृच्छति स्म यत् किं भवान् ईश्वरं दृष्टवान्? इति। ईश्वरं ज्ञातुं पाश्चात्यदर्शनस्य भारतीयदर्शनस्य च गभीरम् अध्ययनं कुर्वन् अयं नरेन्द्रः विश्वविद्यालयस्य स्नातकपदवीम् अधिगतवान्। अस्मिन्नेव समये दैवयोगात् दक्षिणेश्वरस्थे कालीमन्दिरे परमहंसस्य रामकृष्णदेवस्य दर्शनं तेन प्राप्तम्। रामकृष्णमुद्दिश्य नरेन्द्रः पृष्टवान् 'किं भवान् ईश्वरं दृष्टवान् ?'इति। 'आम्। त्वामिव ईश्वरमपि पश्यामि' इति श्रीरामकृष्णदेवः स्मयमानः अवदत्। एष एव महापुरुषः नरेन्द्रस्य अध्यात्म-गुरुः अभवत्।
सन्यासदीक्षानन्तरं नरेन्द्रस्य नाम विवेकानन्दः इति अभवत्। अयं च नरेन्द्रः भारतभ्रमणं योगसाधनां च कृत्वा त्रिनवत्यधिकाष्टादशत(१८९३)तमे वर्षे अमेरिकादेशस्य शिकागोनगरे विश्वधर्मसभायां भारतस्य गौरवं प्रतिष्ठापितवान् । तत्र सभास्थले विविध धर्मग्रन्थाः एकस्य उपरि एकः इति क्रमेण स्थापिताः आसन् । संयोगवशात् श्रीमद्भगवद्गीता सर्वेषां पुस्तकानाम् अधः आसीत् । एकः अमेरिकावासी उपहासपूर्वकम् अवदत् – 'स्वामिन्।
भवतो गीता सर्वेषां धर्मग्रन्थानाम् अधः वर्तते' इति । प्रत्युत्पन्नमतिः स्वामी विवेकानन्दः हसन्नेव प्रत्यवदत् – 'आम् । सत्यम्। आधारशिला तु अधः एव भवति। सा यदि बहिः स्वीक्रियेत तर्हि समग्रम् अधः पतिष्यति' इति। महत्वपूर्ण का पुत्रविदेशेषु वेदान्तधर्मस्य प्रचारं कृत्वा भारतं प्रत्यागतः सः देशोद्धाराय युवकान् प्रेरितवान्। जनसेवा, स्वास्थ्यरक्षा, स्त्रीशिक्षा, आधुनिकप्रौद्योगिकी प्रभृतिषु क्षेत्रेषु असाधारणं कार्यं कर्तुं 'रामकृष्णमिशन्' इति संस्थां संस्थाप्य जनेषु शक्तिजागरणं कृतवान्